# कठोपनिषद्

**शान्तिपाठः**

ॐ सह नाववतु। स ह नौ भुनक्तु।

सह वीर्यं कर्वावहै। तेजस्वि नावधीतमस्तु मा विद्विषावहै।

ॐ शान्तिः शान्तिः शान्तिः॥

om saha nāvavatu | sa ha nau bhunaktu |

saha vīryaṁ karvāvahai | tejasvi nāvadhītamastu mā vidviṣāvahai |

om śāntiḥ śāntiḥ śāntiḥ ||

# कठोपनिषद्

### प्रथमाध्यायः

### प्रथम वल्ली

१।१।१

उशन्ह वै वाजश्रवसः सर्ववेदसं ददौ।

तस्य ह नचिकेता नाम पुत्र आस ॥१।१।१

uśanha vai vājaśravasaḥ sarvavedasaṁ dadau |

tasya ha naciketā nāma putra āsa ||1|1|1

१।१।२

तꣳह कुमारꣳ सन्तंदक्षिणासु नीयमानासु

श्रद्धाऽऽविवेश सोऽमन्यत ॥१।१।२॥

tagm ha kumāragm santaṁ dakṣiṇāsu nīyamānāsu

śraddhā''viveśa so'manyata ||1|1|2||

१।१।३

पीतोदका जग्धतृणाः दुग्धदोहा निरिन्द्रियाः।

अनन्दा नाम ते लोकास्तान् स गच्छति ता  ददत् ॥१।१।३

pītodakā jagdhatṛṇāḥ dugdhadohā nirindriyāḥ |

anandā nāma te lokāstān sa gacchati tā dadat ||1|1|3

१।१।४

स होवाच पितरं तत कस्मै मां दास्यसीति।

द्वितीयं तृतीयं तꣳ होवाच मृत्यवे त्वा ददामीति ॥१।१।४॥

sa hovāca pitaraṁ tata kasmai māṁ dāsyasīti |

dvitīyaṁ tṛtīyaṁ tagm hovāca mṛtyave tvā dadāmīti ||1|1|4||

१।१।५

बहूनामेमि प्रथमो बहूनामेमि मध्यमः।

किꣳ स्विद्यमस्य कर्तव्यं यन्मयाद्य करिष्यति ॥१।१।५॥

bahūnāmemi prathamo bahūnāmemi madhyamaḥ |

kigm svidyamasya kartavyaṁ yanmayādya kariṣyati ||1|1|5||

१।१।६

अनुपश्य यथा पूर्वे प्रतिपश्य तथापरे।

सस्यमिव मर्त्यः पच्यते सस्यमिवाजायते पुनः ॥१।१।६॥

anupaśya yathā pūrve pratipaśya tathāpare |

sasyamiva martyaḥ pacyate sasyamivājāyate punaḥ ||1|1|6||

१।१।७

वैश्वानरः प्रविशत्यतिथिर्ब्राह्मणो गृहान्।

तस्यैताꣳशान्तिं कुर्वन्ति हर वैवस्वतोदकम् ॥१।१।७॥

vaiśvānaraḥ praviśatyatithirbrāhmaṇo gṛhān |

tasyaitāgm śāntiṁ kurvanti hara vaivasvatodakam ||*1|1|7*||

१।१।८

आशाप्रतीक्षे सङ्गतꣳ सूनृतां च

इष्टापूर्ते पुत्रपशूꣳश्च सर्वान्।

एतद् वृङ्क्ते पुरुषस्याल्पमेधसो

यस्यानश्नन् वसति ब्राह्मणो गृहे ॥१।१।८॥

āśāpratīkṣe saṅgatagm sūnṛtāṁ ca

iṣṭāpūrte putrapaśūgmśca sarvān |

etad vṛṅkte puruṣasyālpamedhaso

yasyānaśnan vasati brāhmaṇo gṛhe ||1|1|8||

१।१।९

तिस्रो रात्रीर्यदवात्सीर्गृहे मे

अनश्नन् ब्रह्मन्नतिथिर्नमस्यः।

नमस्तेऽस्तु ब्रह्मन् स्वस्ति मेऽस्तु

तस्मात् प्रति त्रीन्वरान्वृणीष्व ॥१।१।९॥

tisro rātrīryadavātsīrgṛhe me

anaśnan brahmannatithirnamasyaḥ |

namaste'stu Brahman svasti me'stu

tasmāt prati trīn varān vṛṇīṣva ||1|1|9||

# कठोपनिषद्

१।१।१०

शान्तसङ्कल्पः सुमना यथा स्याद्

वीतमन्युर्गौतमो माभि मृत्यो।

त्वत्प्रसृष्टं माभिवदेत्प्रतीत

एतत्त्रयाणां प्रथमं वरं वृणे ॥१।१।१०॥

śāntasaṅkalpaḥ sumanā yathā syād

vītamanyurgautamo mābhi mṛtyo |

tvatprasṛṣṭaṁ mābhivadetpratīta

etat trayāṇāṁ prathamaṁ varaṁ vṛṇe ||*1*|*1*|*10*||

१।१।११

यथा पुरस्ताद्  भविता प्रतीत

औद्दालकिरारुणिर्मत्प्रसृष्टः।

सुखꣳ रात्रीः शयिता वीतमन्युस्-

त्वां ददृशिवान्मृत्युमुखात्प्रमुक्तम् ॥१।१।११॥

yathā purastād bhavitā pratīta

auddālakirāruṇirmatprasṛṣṭaḥ |

sukhagm rātrīḥ śayitā vītamanyus-

tvāṁ dadṛśivānmṛtyumukhātpramuktam ||*1*|*1*|*11*||

१।१।१२

स्वर्गे लोके न भयं किञ्चनास्ति

न तत्र त्वं न जरया बिभेति।

उभे तीर्त्वाशनायापिपासे

शोकातिगो मोदते स्वर्गलोके ॥१।१।१२॥

svarge loke na bhayaṁ kiñcanāsti

na tatra tvaṁ na jarayā bibheti |

ubhe tīrtvāśanāyāpipāse

śokātigo modate svargaloke ||1|1|12||

१।१।१३

स त्वमग्निꣳ स्वर्ग्यमध्येषि मृत्यो

प्रब्रूहि त्वꣳ श्रद्दधानायमह्यम्।

स्वर्गलोका अमृतत्वं भजन्ते

एतद्द्वितीयेन वृणे वरेण ॥१।१।१३॥

sa tvamagnigm svargyamadhyeṣi mṛtyo

prabrūhi tvagm śraddadhānāya mahyam |

svargalokā amṛtatvaṁ bhajante

etad dvitīyena vṛṇe vareṇa ||1|1|13||

१।१।१४

प्र ते ब्रवीमि तदु मे निबोध

स्वर्ग्यमग्निं नचिकेतः प्रजानन्।

अनन्तलोकाप्तिमथो प्रतिष्ठाम्

विद्धि त्वमेतं निहितं गुहायाम् ॥१।१।१४॥

pra te bravīmi tadu me nibodha

svargyamagniṁ naciketaḥ prajānan |

anantalokāptimatho pratiṣṭhāṁ

viddhi tvametaṁ nihitaṁ guhāyām ||1|1|14||

१।१।१५

लोकादिमग्निं तमुवाच तस्मै

या इष्टका यावतीर्वा यथा वा।

स चापि तत्प्रत्यवदद्यथोक्तम्

अथास्य मृत्युः पुनरेवाह तुष्टः ॥१।१।१५॥

lokādimagniṁ tamuvāca tasmai

yā iṣṭakā yāvatīrvā yathā vā |

sa cāpi tatpratyavadadyathoktam

athāsya mṛtyuḥ punarevāha tuṣṭaḥ ||*1*|*1*|*15*||

१।१।१६

तमब्रवीत् प्रीयमाणो महात्मा

वरं तवेहाद्य ददामि भूयः।

तवैव नाम्ना भवितायमग्निः

सृङ्कां चेमामनेकरूपां गृहाण ॥१।१।१६॥

Tamabravīt prīyamāṇo mahātmā

varaṁ tavehādya dadāmi bhūyaḥ |

tavaiva nāmnā bhavitāyamagniḥ

sṛṅkāṁ cemāmanekarūpāṁ gṛhāṇa ||*1*|*1*|*16*||

१।१।१७

त्रिणाचिकेतस्त्रिभिरेत्य सन्धिं

त्रिकर्मकृत् तरति जन्म मृत्यु।

ब्रह्मजज्ञं देवमीड्यं विदित्वा

निचाय्येमाꣳ शान्तिमत्यन्तमेति ॥१।१।१७॥

triṇāciketastribhiretya sandhiṁ

trikarmakṛt tarati janmamṛtyu |

brahmajajñaṁ devamīḍyaṁ viditvā

nicāyyemāgm śāntimatyantameti ||1|1|17||

१।१।१८

त्रिणाचिकेतस्त्रयमेतद्विदित्वा

य एवं विद्वाꣳश्चिनुते नाचिकेतम्।

स मृत्युपाशान् पुरतः प्रणोद्य

शोकातिगो मोदते स्वर्गलोके ॥१।१।१८॥

triṇāciketastrayametadviditvā

ya evaṁ vidvāgmścinute nāciketam |

sa mṛtyupāśān purataḥ praṇodya

śokātigo modate svargaloke ||1|1|18||

१।१।१९

एष तेऽग्निर्नचिकेतः स्वर्ग्यो

यमवृणीथा द्वितीयेन वरेण।

एतमग्निं तवैव प्रवक्ष्यन्ति जनासः

तृतीयं वरं नचिकेतो वृणीष्व ॥१।१।१९॥

eṣa te'gnirnaciketaḥ svargyo

yamavṛṇīthā dvitīyena vareṇa ।

etamagniṁ tavaiva pravakṣyanti janāsaḥ

tṛtīyaṁ varaṁ naciketo vṛṇīṣva ||1|1|19||

१।१।२०

येयं प्रेते विचिकित्सा मनुष्ये-

ऽस्तीत्येके नायमस्तीति चैके।

एतद्विद्यामनुशिष्टस्त्वयाहं

वराणामेष वरस्तृतीयः ॥१।१।२०॥

yeyaṁ prete vicikitsā manuṣye-

'stītyeke nāyamastīti caike |

etadvidyāmanuśiṣṭastvayāhaṁ

varāṇāmeṣa varastṛtīyaḥ ||1|1|20||

१।१।२१

देवैरत्रापि विचिकित्सितं पुरा

न हि सुविज्ञेयमणुरेष धर्मः।

अन्यं वरं नचिकेतो वृणीष्व

मा मोपरोत्सीरति मा सृजैनम् ॥१।१।२१॥

devairatrāpi vicikitsitaṁ purā

na hi suvijñeyamaṇureṣa dharmaḥ |

anyaṁ varaṁ naciketo vṛṇīṣva

mā moparotsīrati mā sṛjainam ||1|1|21||

१।१।२२

देवैरत्रापि विचिकित्सितं किल

त्वं च मृत्यो यन्न सुज्ञेयमात्थ।

वक्ता चास्य त्वादृगन्यो न लभ्यो

नान्यो वरस्तुल्य एतस्य कश्चित् ॥१।१।२२॥

devairatrāpi vicikitsitaṁ kila

tvaṁ ca mṛtyo yanna  sujñeyamāttha |

vaktā cāsya tvādṛganyo na labhyo

nānyo varastulya etasya kaścit ||1|1|22||

१।१।२३॥

शतायुषः पुत्रपौत्रान्वृणीष्व

बहून्पशून्हस्तिहिरण्यमश्वान्।

भूमेर्महदायतनं वृणीष्व

स्वयं च जीव शरदो यावदिच्छसि ॥१।१।२३॥

śatāyuṣaḥ putrapautrān vṛṇīṣva

bahūn paśūn hastihiraṇyamaśvān |

bhūmermahadāyatanaṁ vṛṇīṣva

svayaṁ ca jīva śarado yāvadicchasi ||1|1|23||

१।१।२४

एतत्तुल्यं यदि मन्यसे वरं

वृणीष्व वित्तं चिरजीविकां च।

महाभूमौ नचिकेतस्त्वमेधि

कामानां त्वा कामभाजं करोमि ॥१।१।२४॥

etattulyaṁ yadi manyase varaṁ

vṛṇīṣva vittaṁ cirajīvikāṁ ca |

mahābhūmau naciketastvamedhi

kāmānāṁ tvā kāmabhājaṁ karomi ||1|1|24||

१।१।२५

ये ये कामा दुर्लभा मर्त्यलोके

सर्वान्कामाꣳ श्छन्दतः प्रार्थयस्व।

इमा रामाः सरथाः सतूर्या

न हीदृशा लम्भनीया मनुष्यैः।

आभिर्मत्प्रत्ताभिः परिचारयस्व

नचिकेतो मरणं मानुप्राक्षीः ॥१।१।२५॥

ye ye kāmā durlabhā martyaloke

sarvān kāmāgm śchandataḥ prārthayasva|

imā rāmāḥ sarathāḥ satūryā

na hīdṛśā lambhanīyā manuṣyaiḥ|

ābhirmatprattābhiḥ paricārayasva

naciketo maraṇaṁ mānuprākṣīḥ||1|1|25||

१।१।२६

श्वोभावा मर्त्यस्य यदन्तकैतत्

सर्वेन्द्रियाणां जरयन्ति तेजः।

अपि सर्वं जीवितमल्पमेव

तवैव वाहास्तव नृत्यगीते ॥१।१।२६॥

śvobhāvā martyasya yadantakaitat

sarvendriyāṇāṁ jarayanti tejaḥ |

api sarvaṁ jīvitamalpameva

tavaiva vāhāstava nṛtyagīte ||1|1|26||

१।१।२७

न वित्तेन तर्पणीयो मनुष्यो

लप्स्यामहे वित्तमद्राक्ष्म चेत्त्वा।

जीविष्यामो यावदीशिष्यसि त्वं

वरस्तु मे वरणीयः स एव ॥१।१।२७॥

na vittena tarpaṇīyo manuṣyo

lapsyāmahe vittamadrākṣma cettvā |

jīviṣyāmo yāvadīśiṣyasi tvaṁ

varastu me varaṇīyaḥ sa eva ||1|1|27||

**१।१।२८**

अजीर्यताममृतानामुपेत्य

जीर्यन्मर्त्यः क्वधःस्थः प्रजानन्।

अभिध्यायन् वर्णरतिप्रमोदान्

अतिदीर्घे जीविते को रमेत ॥१।१।२८॥

ajīryatāmamṛtānāmupetya

jīryan martyaḥ kvadhaḥ sthaḥ prajānan |

abhidhyāyan varṇaratipramodān

atidīrghe jīvite ko rameta ||1|1|28||

१।१।२९

यस्मिन्निदं विचिकित्सन्ति मृत्यो

यत्साम्प्राये महति ब्रूहि नस्तत्।

योऽयं वरो गूढमनुप्रविष्टो

नान्यं तस्मान्नचिकेता वृणीते ॥१।१।२९॥

yasminnidaṁ vicikitsanti mṛtyo

yatsāmprāye mahati brūhi nastat |

yo'yaṁ varo gūḍhamanupraviṣṭo

nānyaṁ tasmānnaciketā vṛṇīte ||1|1|29||

इति प्रथमा वल्लि

## द्वितीय वल्ली

१।२।१

अन्यच्छ्रेयोऽन्यदुतैव प्रेयः

ते उभे नानार्थे पुरूषꣳ सिनीतः।

तयोः श्रेय आददानस्य साधुभ वति

हीयतेऽर्थाद्य उ प्रेयो वृणीते ॥१।२।१॥

anyacchreyo'nyadutaiva preyaḥ

te ubhe nānārthe purūṣagm sinītaḥ |

tayoḥ śreya ādadānasya sādhu bhavati

hīyate'rthādya u preyo vṛṇīte ||1|2|1||

१।२।२

श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ

सम्परीत्य विविनक्ति धीरः।

श्रेयो हि धीरोऽभि प्रेयसो वृणीते

प्रेयो मन्दो योगक्षेमाद्वृणीते ॥१।२।२॥

śreyaśca preyaśca manuṣyametas-

tau samparītya vivinakti dhīraḥ |

śreyo hi dhīro'bhi preyaso vṛṇīte

preyo mando yogakṣemād vṛṇīte ||1|2|2||

१।२।३

स त्वं प्रियान्प्रियरूपाꣳ श्च कामान्

अभिध्यायन्नचिकेतोऽत्यस्राक्षीः।

नैताꣳ  सृङ्कां वित्तमयीमवाप्तो

यस्यां मज्जन्ति बहवो मनुष्याः ॥१।२।३॥

sa tvaṁ priyān priyarūpāg śca kāmān

abhidhyāyannaciketo'tyastrākṣīḥ |

naitāgm sṛṅkāṁ vittamayīmavāpto

yasyāṁ majjanti bahavo manuṣyāḥ ||1|2|3||

१।२।४

दूरमेते विपरीते विषूची

अविद्या या च विद्येति ज्ञाता।

विद्याभीप्सिनं नचिकेतसं मन्ये

न त्वा कामा बहवोऽलोलुपन्त ॥१।२।४।

dūramete viparīte viṣūcī

avidyā yā ca vidyeti jñātā |

vidyābhīpsinaṁ naciketasaṁ manye

na tvā kāmā bahavo'lolupanta ||1|2|4|

१।२।५

अविद्यायामन्तरे वर्तमानाः

स्वयं धीराः पण्डितंमन्यमानाः।

दन्द्रम्यमाणाः परियन्ति मूढाः

अन्धेनैव नीयमाना यथान्धाः ॥१।२।५॥

avidyāyāmantare vartamānāḥ

svayaṁ dhīrāḥ paṇḍitaṁ manyamānāḥ |

dandramyamāṇāḥ pariyanti mūḍhāḥ

andhenaiva nīyamānā yathāndhāḥ ||1|2|5||

१।२।६

न साम्परायः प्रतिभाति बालं

प्रमाद्यन्तं वित्तमोहेन मूढम् ।

अयं लोको नास्ति पर इति मानी

पुनः पुनर्वशमापद्यते मे ॥१।२।६॥

na sāmparāyaḥ pratibhāti bālaṁ

pramādyantaṁ vittamohena mūḍham|

ayaṁ loko nāsti para iti mānī

punaḥ punarvaśamāpadyate me ||1|2|6||

१।२।७

श्रवणायापि बहुभिर्यो न लभ्यः

शृण्वन्तोऽपि बहवो यं न विद्युः।

आश्चर्यो वक्ता कुशलोऽस्य लब्धा-

ऽऽश्चर्यो ज्ञाता कुशलानुशिष्टः ॥१।२।७॥

śravaṇāyāpi bahubhiryo na labhyaḥ

śṛṇvanto'pi bahavo yaṁ na vidyuḥ ।

āścaryo vaktā kuśalo'syalabdhā-

''ścaryo jñātā kuśalānuśiṣṭaḥ ।।1।2।7 ।।

१।२।८

न नरेणावरेण प्रोक्त एष

सुविज्ञेयो बहुधा चिन्त्यमानः।

अनन्यप्रोक्ते गतिरत्र नास्ति

अणीयान् ह्यतर्क्यमणुप्रमाणात् ॥१।२।८॥

na nareṇāvareṇa prokta eṣaḥ

suvijñeyo bahudhā cintyamānaḥ |

ananyaprokte gatiratra nāsti

aṇīyān hyatarkyamaṇupramāṇāt ||1|2|8||

१।२।९

नैषा तर्केण मतिरापनेया

प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ।

यां त्वमापः सत्यधृतिर्बतासि

त्वादृङ्नो भूयान्नचिकेतः प्रष्टा ॥१।२।९॥

naiṣā tarkeṇa matirāpaneyā

proktānyenaiva sujñānāya preṣṭha|

yāṁ tvamāpaḥ satyadhṛtirbatāsi

tvādṛṅ no bhūyānnaciketaḥ praṣṭā ||1|2|9||

१।२।१०

जानाम्यहꣳ शेवधिरित्यनित्यं

न ह्यध्रुवैः प्राप्यते हि ध्रुवं तत्।

ततो मया नचिकेतश्चितोऽग्निः

अनित्यैर्द्रव्यैः प्राप्तवानस्मि नित्यम् ॥१।२।१०॥

jānāmyahagm śevadhirityanityaṁ

na hyadhruvaiḥ praapyate hi dhruvaṁ tat |

tato mayā naciketaścito'gniḥ

anityairdṛvyaiḥ prāptavānasmi nityam ||1|2|10||

१।२।११

कामास्याप्तिं जगतः प्रतिष्ठां

क्रतोरनन्त्यमभयस्य पारम्।

स्तोममहदुरुगायं प्रतिष्ठां

दृष्ट्वा धृत्या धीरो नचिकेतोऽत्यस्राक्षीः ॥१।२।११।

kāmāsyāptiṁ jagataḥ pratiṣṭhāṁ

krator-anantyam-abhayasya pāram ।

stoma-mahadurugāyaṁ pratiṣṭhāṁ

dṛṣṭvā dhṛtyā dhīro naciketo'tyasrākṣīḥ।।1।2।11।

१।२।१२

तं दुर्दर्शं गूढमनुप्रविष्टं

गुहाहितं गह्वरेष्ठं पुराणम्।

अध्यात्मयोगाधिगमेन देवं

मत्वा धीरो हर्शशोकौ जहाति ॥१।२।१२॥

taṁ durdarśaṁ gūḍhamanupraviṣṭaṁ

guhāhitaṁ gahvareṣṭhaṁ purāṇam ǀ

adhyātmayogādhigamena devaṁ

matvā dhīro harśaśokau jahāti ǀǀ1ǀ2ǀ12ǀǀ

१।२॥१३

एतच्छ्रुत्वा सम्परिगृह्य मर्त्यः

प्रवृह्य धर्म्यमणुमेतमाप्य।

स मोदते मोदनीयꣳ हि लब्ध्वा

विवृतꣳ सद्म नचिकेतसं मन्ये ॥१।२॥१३॥

etacchrutvā samparigṛhya martyaḥ

pravṛhya dharmyamaṇumetamāpya |

sa modate modanīyagm hi labdhvā

vivṛtagm sadma naciketasaṁ manye ||1|2||13||

**१।२।१४**

**अन्यत्र धर्मादन्यत्राधर्माद्**

**अन्यत्रास्मात्कृताकृतात् ।**

**अन्यत्र भूताच्च भव्याच्च**

**यत्तत्पश्यसि तद्वद ॥१।२।१४॥**

anyatra dharmādanyatrādharmād

anyatrāsmāt kṛtākṛtāt |

anyatra bhūtācca bhavyācca

yattatpaśyasi tadvada ||1|2|14||

१।२।१५

सर्वे वेदा यत्पदमामनन्ति

तपाꣳसि सर्वाणि च यद्वदन्ति।

यदिच्छन्तो ब्रह्मचर्यं चरन्ति

तत्तेपदꣳसङ्ग्रहेण ब्रवीम्योमित्येतत् ॥१।२।१५॥

sarve vedā yat padamāmananti

tapāgmsi sarvāṇi ca yad vadanti |

yadicchanto brahmacaryaṁ caranti

tatte padagm saṅgraheṇa bravīmi omityetat ||1|2|15||

१।२।१६

एतद्धयेवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम्।

एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् ॥१।२।१६।

etaddhayevākṣaraṁ brahma etaddhyevākṣaraṁ param |

etaddhyevākṣaraṁ jñātvā yo yadicchati tasya tat ||1|2|16|

१।२।१७

एतदालम्बनꣳ  श्रेष्ठम् एतदालम्बनं परम्।

एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते ॥१।२।१७॥

etadālambanagm śreṣṭham etadālambanaṁ param |

etadālambanaṁ jñātvā brahmaloke mahīyate ||1|2|17||

१।२।१८

न जायते म्रियते वा विपश्चिद्

नायं कुतश्चिन्न बभूव कश्चित्।

अजो नित्यः शाश्वतोऽयं पुराणो

न हन्यते हन्यमाने शरीरे ॥१।२।१८॥

na jāyate mriyate vā vipaścid

nāyaṁ kutaścinna babhūva kaścit |

ajo nityaḥ śāśvato'yaṁ purāṇo

na hanyate hanyamāne śarīre ||1|2|18||

१।२।१९

हन्ता चेन्मन्यते हन्तुंऽ

हतश्चेन्मन्यते हतम्।

उभौ तौ न विजानीतो

नायंऽ हन्ति न हन्यते ॥१।२।१९॥

hantā cenmanyate hantugm

hataścenmanyate hatam ।

ubhau tau na vijānīto

nāyagm hanti na hanyate ||1|2|19||

१।२।२०

अणोरणीयान्महतो महीयान्

आत्मास्य जन्तोर्निहितो गुहायाम्।

तमक्रतुः पश्यति वीतशोकः

धातुप्रसादान्महिमानमात्मनः ॥१।२।२०॥

aṇoraṇīyānmahato mahīyān

ātmāsya jantornihito guhāyām |

tamakratuḥ paśyati vītaśokaḥ

dhātuprasādānmahimānamātmanaḥ ||1|2|20||

१।२।२१

आसीनो दूरं व्रजति

शयानो याति सर्वतः।

कस्तं मदामदं देवं

मदन्यो ज्ञातुमर्हति ॥१।२।२१॥

āsīno dūraṁ vrajati

śayāno yāti sarvataḥ ।

kastaṁ madāmadaṁ devaṁ

madanyo jñātumarhati ।।1।2।21।।

१।२।२२

अशरीरꣳ शरीरेष्वनवस्थेष्ववस्थितम्।

महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥१।२।२२॥

aśarīraꣳ śarīreṣvanavastheṣvavasthitam ।

mahāntaṁ vibhumātmānaṁ matvā dhīro na śocati ।।1।2।22।।

१।२।२३

नायमात्मा प्रवचनेन लभ्यः न मेधया न बहुना श्रुतेन।

यमेवैष वृणुते तेन लभ्यः तस्यैष आत्मा विवृणुते तनूँ स्वाम् ॥१।२।२३॥

nāyamātmā pravacanena labhyaḥ na medhayā na bahunā śrutena |

yamevaiṣa vṛṇute tena labhyaḥ tasyaiṣa ātmā vivṛṇute tanūgm svām ||1|2|23||

१।२॥२४

नाविरतो दुश्चरितान्नाशान्तो नासमाहितः।

नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात् ॥१।२॥२४॥

nāvirato duścaritānnāśānto nāsamāhitaḥ |

nāśāntamānaso vāpi prajñānenainamāpnuyāt ||1|2||24||

**१।२।२५**

**यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः।**

**मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः ॥१।२।२५॥**

yasya brahma ca kṣatraṁ ca ubhe bhavata odanaḥ |

mṛtyuryasyopaseacanaṁ ka itthā veda yatra saḥ ||1|2|25||

## तृतीयवल्ली

१।३।१

ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे।

छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः ॥१।३।१॥

ṛtaṁ pibantau sukṛtasya loke guhāṁ praviṣṭau parame parārdhe

|

chāyātapau brahmavido vadanti pañcāgnayo ye ca triṇāciketāḥ

||1|3|1||

१।३।२

यः सेतुरीजानानामक्षरं ब्रह्म यत्परम्।

अभयं तितीर्षतां पारं नाचिकेतँ शकेमहि ॥१।३।२॥

yaḥ seturījānānām akṣaraṁ brahma yatparam |

abhayaṁ titīrṣatāṁ pāraṁ nāciketaṁ̐ śakemahi ||1|3|2||

१।३।३

आत्मानꣳ रथिनं विद्धि शरीरꣳ रथमेव तु।

बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥१।३।३॥

ātmānaṁ̐ rathinaṁ viddhi śarīraṁ̐ rathameva tu |

buddhiṁ tu sārathiṁ viddhi manaḥ pragrahameva ca ||1|3|3||

१।३।४

इन्द्रियाणि हयानाहुर्विषयाꣳ स्तेषु गोचरान्।

आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण: ॥१।३।४॥

indriyāṇi hayānāhurviṣayāṁ̐ steṣu gocarān |

ātmendriyamanoyuktaṁ bhoktetyāhurmanīṣiṇaḥ ||1|3|4||

१।३।५

यस्त्वविज्ञानवान् भवत्ययुक्तेन मनसा सदा।

तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः ॥१।३।५॥

yastvavijñānavān bhavatyayuktena manasā sadā |

tasyendriyāṇyavaśyāni duṣṭāśvā iva sāratheḥ ||1|3|5||

**१।३।६**

**यस्तु विज्ञानवान् भवति युक्तेन मनसा सदा।**

**तस्येन्द्रियणि वश्यानि सदश्वा इव सारथेः ॥१।३।६॥**

yastu vijñānavān bhavati yuktena manasā sadā |

tasyendriyaṇi vaśyāni sadaśvā iva sāratheḥ ||1|3|6||

**१।३।७**

**यस्त्वविज्ञानवान् भवत्यमनस्कः सदाशुचिः।**

**न स तत्पदमाप्नोति सꣳसारं चाधिगच्छति ॥१।३।७॥**

Yastvavijñānavān bhavatyamanaskaḥ sadāśuciḥ |

na sa tatpadamāpnoti sagmsāraṁ cādhigacchati ||1|3|7||

१।३॥८

यस्तु विज्ञानवान् भवति समनस्कः सदा शुचिः।

स तु तत्पदमाप्नोति यस्माद्भूयो न जायते ॥१।३॥८॥

yastu vijñānavān bhavati samanaskaḥ sadā śuciḥ |

sa tu tatpadamāpnoti yasmād bhūyo na jāyate ||1|3||8||

१।३।९

विज्ञानसारथिर्यस्तु मनःप्रग्रहवान् नरः।

सोऽध्वनः पारमाप्नोति तद्विष्णोः परमंपदम् ॥१।३।९॥

vijñānasārathiryastu manaḥ pragrahavān naraḥ |

so'dhvanaḥ pāramāpnoti tadviṣṇoḥ paramaṁ padam ||1|3|9||

१।३।१०

इन्द्रियेभ्यः परा ह्यर्थाः अर्थेभ्यश्च परं मनः।

मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः ॥१।३।१०॥

indriyebhyaḥ parā hyarthāḥ arthebhyaśca paraṁ manaḥ |

manasastu parā buddhirbuddherātmā mahān paraḥ ||1|3|10||

**१।३।११**

**महतः परमव्यक्तमव्यक्तात् पुरुषः परः।**

**पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः ॥१।३।११॥**

mahataḥ paramavyaktam avyaktāt puruṣaḥ paraḥ |

puruṣānna paraṁ kiñcit sā kāṣṭhā sā parā gatiḥ ||1|3|11||

१।३।१२

**एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते।**

**दृश्यते त्वग्रयया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ॥१।३।१२॥**

eṣa sarveṣu bhūteṣu gūḍhotmā na prakāśate |

dṛśyate tvagrayayā buddhyā sūkṣmayā sūkṣmadarśibhiḥ ||1|3|12||

**१।३।१३**

**यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि।**

**ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि ॥१।३।१३॥**

yacched vāṅmanasī prājñastad yacchejjñāna ātmani |

jñānamātmani mahati niyacchet tadyacchecchānta ātmani ||1|3|13||

१।३।१४

उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत।

क्षुरस्य धारा निशिता दुरत्यया

दुर्गं पथस्तत्कवयो वदन्ति ॥१।३।१४॥

uttiṣṭhata jāgrata prāpya varānnibodhata ।

kṣurasya dhārā niśitā duratyayā

durgaṁ pathastatkavayo vadanti ।।1।3।14।।

१।३।१५

अशब्दमस्पर्शमरुपमव्ययं

तथारसं नित्यमगन्धवच्च यत्।

अनाद्यनन्तं महतः परं ध्रुवं

निचाय्य तन्मृत्युमुखात्प्रमुच्यते ॥१।३।१५॥

aśabdamasparśamarupamavyayaṁ

tathārasaṁ nityamagandhavacca yat ।

anādyanantaṁ mahataḥ paraṁ dhruvaṁ

nicāyya tanmṛtyumukhāt pramucyate ।।1।3।15।

# कठोपनिषद्

१।३।१६

नाचिकेतमुपाख्यानं मृत्युप्रोक्तꣳसनातनम्।

उक्त्वा श्रुत्वा च मेधावी ब्रह्मलोके महीयते ॥१।३।१६॥

nāciketamupākhyānaṁ mṛtyuproktagm sanātanam ।

uktvā śrutvā ca medhāvī brahmaloke mahīyate ।।1।3।16।।

१।३।१७

य इमं परमं गुह्यं श्रावयेद् ब्रह्मसंसदि।

प्रयतः श्राद्धकाले वा तदानन्त्याय कल्पते

तदानन्त्याय कल्पत इति ॥१।२।१७॥

ya imaṁ paramaṁ guhyaṁ śrāvayed brahmasaṁsadi ।

prayataḥ śrāddhakāle vā tadānantyāya kalpate

tadānantyāya kalpata iti ।।1।2।17।।

तृतीय वल्ली समाप्त ।।३।।

प्रथम अध्याय समाप्त ।।१।।

ॐ

## द्वितीयाध्यायः

## प्रथमावल्ली

२।१।१

पराञ्चि खानि व्यतृणत् स्वयम्भूस्तस्मात्पराङ्पश्यति नान्तरात्मन्।
कश्चिद्धीरः प्रत्यगात्मानमैक्षद्-
आवृत्तचक्षुरमृतत्वमिच्छन् ॥२।१।१॥

parāñci khāni vyatṛṇat svayambhūs-
tasmātparāṅpaśyati nāntarātman |
kaściddhīraḥ pratyagātmānamaikṣad-
āvṛttacakṣuramṛtatvamicchan ||2|1|1||

२।१।२

पराचः कामाननुयन्ति बालास्ते मृत्योर्यन्ति विततस्य पाशम्।
अथ धीरा अमृतत्वं विदित्वा ध्रुवमध्रुवेष्विह न प्राथयन्ते ॥२।१।२॥

parācaḥ kāmānanuyanti bālāste mṛtyoryanti vitatasya pāśam |
atha dhīrā amṛtatvaṁ viditvā dhruvamadhruveṣviha na prāthayante ||2|1|2||

२।१।३

येन रूपं रसं गन्धं शब्दान्स्पर्शांश्च मैथुनान्।
एतेनैव विजानाति किमत्र परिशिष्यते॥ एतद्वै तत् ॥२।१।३॥

yena rūpaṁ rasaṁ gandhaṁ śabdānsparśāgśca maithunān |
etenaiva vijānāti kimatra pariśiṣyate || etadvai tat ||2|1|3||

२।१।४

स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥२।१।४॥

svapnāntaṁ jāgaritāntaṁ cobhau yenānupaśyati |
mahāntaṁ vibhumātmānaṁ matvā dhīro na śocati ||2|1|4||

२।१।५

य इमं मध्वदं वेद आत्मानं जीवमन्तिकात्।

ईशानं भूतभव्यस्य न ततो विजुगुप्सते ॥ एतद्वै तत् ॥२।१।५॥

ya imaṁ madhvadaṁ veda ātmānaṁ jīvamantikāt |

īśānaṁ bhūtabhavyasya na tato vijugupsate || etadvai tat ||2|1|5||

२।१।६

यः पूर्वं तपसो जातमद्भ्यः पूर्वमजायत।

गुहां प्रविश्य तिष्ठन्तं यो भूतेभिर्व्यपश्यत्॥ एतद्वैतत् ॥२।१।६॥

yaḥ pūrvaṁ tapaso jātamadbhyaḥ pūrvamajāyata |

guhāṁ praviśya tiṣṭhantaṁ yo bhūtebhirvyapaśyat ||

etadvai tat ||2|1|6||

**२।१।७**

**याप्राणेनसम्भवतिअदितिर्देवतामयी।**

**गुहांप्रविश्यतिष्ठन्तीम्याभुतेभिर्व्यजायत।एतद्वैतत् ॥२।१।७॥**

yā prāṇena sambhavati aditirdevatāmayī |

guhāṁ praviśya tiṣṭhantīm yā bhutebhirvyajāyata |

etadvai tat ||2|1|7||

**२।१।८**

**अरण्योर्निहितो जातवेदा गर्भ इव सुभृतो गर्भिणीभिः।**

**दिवे दिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः॥**

**एतद्वै तत् ॥२।१।८॥**

araṇyornihito jātavedā garbha iva subhṛto garbhiṇībhiḥ |

dive diva īḍyo jāgṛvadbhiḥ haviṣmadbhirmanuṣyebhiragniḥ||

etadvai tat ||2|1|8||

२।१।९

यतश्चोदेति सूर्योऽस्तं यत्र च गच्छति।

तं देवाः सर्वे अर्पितास्तदु नात्येति कश्चन॥

एतद्वै तत् ॥२।१।९॥

yataścodeti suryo'staṁ yatra ca gacchati |

taṁ devāḥ sarve arpitāstadu nātyeti kaścana ||

etadvai tat ||2|1|9||

२।१।१०

यदेवेह तदमुत्र यदमुत्र तदन्विह।

मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥२।१।१०॥

yadeveha tadamutra yadamutra tadanviha |

mṛtyoḥ sa mṛtyumāpnoti ya iha nāneva paśyati ||2|1|10||

२।१।११

मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन।

मृत्योः स मृत्युं गच्छति य इह नानेव पश्यति ॥२।१।११॥

manasaivedamāptavyaṁ neha nānāsti kiñcana |

mṛtyoḥ sa mṛtyuṁ gacchati ya iha nāneva paśyati ||2|1|11||

२।१।१२

अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति।

ईशानो भूतभव्यस्य न ततो विजुगुप्सते॥ एतद्वै तत् ॥२।१।१२॥

aṅguṣṭhamātraḥ puruṣo madhya ātmani tiṣṭhati |

īśāno bhūtabhavyasya na tato vijugupsate || etadvai tat ||2|1|12||

२।१।१३

अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः।

ईशानो भूतभव्यस्य स एवाद्य स उ श्वः॥ एतद्वै तत् ॥२।१।१३॥

aṅguṣṭhamātraḥ puruṣo jyotirivādhūmakaḥ |

īśāno bhūtabhavyasya sa evādya sa u śvaḥ || etadvai tat ||2|1|13||

२।१।१४

यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति।

एवं धर्मान् पृथक् पश्यंस्तानेवानुविधावति ॥२।१।१४॥

yathodakaṁ durge vṛṣṭaṁ parvateṣu vidhāvati |

evaṁ dharmān pṛthak paśyaṁstānevānuvidhāvati ||2|1|14||

२।१।१५

यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति।

एवं मुनेर्विजानत आत्मा भवति गौतम॥२।१।१५॥

yathodakaṁ śuddhe śuddhamāsiktaṁ tādṛgeva bhavati |

evaṁ munervijānataḥ ātmā bhavati gautama||2|1|15||

इति प्रथमावल्ली

# कठोपनिषद्

## द्वितीयावल्ली

२।२।१

पुरमेकदशद्वारम् अजस्यावक्रचेतसः ।

अनुष्ठाय् न शोचति विमुक्तश्च विमुच्यते॥ एतद्वै तत्॥२।२।१॥

puramekādaśadvāram ajasyāvakracetasaḥ|

anuṣṭhāya na śocati vimuktaśca vimucyate || etadvaitat ||2|2|1||

२।२।२

हꣳसः शुचिषद् वसुरन्तरिक्षसद्

होता वेदिषदतिथिर्दुरोणसत्।

नृषद् वरसदृतसद् व्योमसदब्जा

गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥२।२।२॥

hagmsaḥ śuciṣad vasurantarikṣasad

hotā vediṣadatithirduroṇasat |

nṛṣad varasadṛtasad vyomasadabjā

gojā ṛtajā adrijā ṛtaṁ bṛhat ||2|2|2||

२।२।३

ऊर्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति।

मध्ये वामनमासीनं विश्वे देवा उपासते॥२।२।३॥

ūrdhvaṁ prāṇamunnayatyapānaṁ pratyagasyati|

madhye vāmanamāsīnaṁ viśve devā upāsate ||2|2|3||

२।२।४

अस्य विस्रंसमानस्य शरीरस्थस्य देहिनः।

देहाद्विमुच्यमानस्य किमत्र परिशिष्यते॥ एतद्वै तत् ॥२।२।४॥

asya visraṁsamānasya śarīrasthasya dehinaḥ |

dehādvimucyamānasya kimatra pariśiṣyate || etadvai tat ||2|2|4||

२।२।५

न प्राणेन नापनेन मर्त्यो जीवति कश्चन।

इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ ॥२।२।५॥

na prāṇena nāpanena martyo jīvati kaścana ।

itareṇa tu jīvanti yasminnetāvupāśritau ।।2।2।5।।

२।२।६

हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनम्।

यथा च मरणं प्राप्य आत्मा भवति गौतम ॥२।२।६॥

hanta ta idaṁ pravakṣyāmi guhyaṁ brahma sanātanam।

yathā ca maraṇaṁ prāpya ātmā bhavati gautama।।2।2।6।।

२।२।७

योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः।

स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम् ॥२।२।७॥

yonimanye prapadyante śarīratvāya dehinaḥ ।

sthāṇumanye'nusaṁyanti yathākarma yathāśrutam ।।2।2।7।।

**२।२।८**

**य एष सुप्तेषु जगर्ति कामं कामं पुरुषो निर्मिमाणः।**

**तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते।**

**तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन॥**

**एतद्वै तत् ॥२।२।८॥**

ya eṣa supteśu jagarti kāmaṁ kāmaṁ puruṣo nirmimāṇaḥ |

tadeva śukraṁ tad brahma tadevāmṛtamucyate |

tasminllokāḥ śritāḥ sarve tadu nātyeti kaścana ||

etadvai tat ||2|2|8||

२।२।९

अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव।

एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च॥२।२।९॥

agniryathaiko bhuvanaṁ praviṣṭo rūpaṁ rūpaṁ pratirūpo babhūva|

ekastathā sarvabhūtāntarātmā rūpaṁ rūpaṁ pratirūpo bahiśca ||2|2|9||

२।२।१०

वायुर्यथैको भुवनं प्रविष्टो रुपं रुपं प्रतिरूपो बभूव।

एकस्तथा सर्वभूतान्तरात्मा रुपं रुपं प्रतिरूपो बहिश्च ॥२।२।१०॥

vāyuryathaiko bhuvanaṁ praviṣṭo rupaṁ rupaṁ pratirūpo babhūva |

ekastathā sarvabhūtāntarātmā rupaṁ rupaṁ pratirūpo bahiśca ||2|2|10||

२।२।११

सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः।

एकस्तथा सर्वभूतान्तरात्मा न लिपयते लोकदुःखेन बाह्यः॥२।२।११॥

sūryo yathā sarvalokasya cakṣurna lipyate cākṣuṣairbāhyadoṣaiḥ|

ekastathā sarvabhūtāntarātmā na lipayate lokaduḥkhena bāhyaḥ ||2|2|11||

२।२।१२

एको वशी सर्वभूतान्तरात्मा एकं रुपं बहुधा यः करोति।

तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम् ॥२।२।१२॥

eko vaśī sarvabhūtāntarātmā ekaṁ rupaṁ bahudhā yaḥ karoti |

tamātmasthaṁ ye'nupaśyanti dhīrāsteṣāṁ sukhaṁ śāśvataṁ netareṣām ||2|2|12||

२।२।१३

नित्यो नित्यानां चेतनश्चेतनानाम्

एको बहूनां यो विदधाति कामान्।

तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां

शान्तिः शाश्वती नेतरेषाम् ॥२।२।१३॥

nityo nityānāṁ cetanaścetanānām

eko bahūnāṁ yo vidadhāti kāmān |

tamātmasthaṁ ye'nupaśyanti dhīrāsteṣāṁ

śāntiḥ śāśvati netareṣām ||2|2|13||

२।२।१४

तदेतदिति मन्यन्तेऽनिर्देश्यं परमं सुखम्।

कथं नु तद्विजानीयां किमु भाति विभाति वा ॥२।२।१४॥

tadetaditi manyate'nirdeśyaṁ paramaṁ sukham |

kathaṁ nu tadvijānīyāṁ kimu bhāti vibhāti vā ||2|2|14||

२।२॥१५

न तत्र सूर्यो भाति न चन्द्रतारकं

नेमा विद्युतो भान्ति कुतोऽयमग्निः।

तमेव भान्तमनुभाति सर्वं

तस्य भासा सर्वमिदं विभाति ॥२।२॥१५॥

na tatra sūryo bhāti na candratārakaṁ

nemā vidyuto bhānti kuto'yamagniḥ ।

tameva bhāntamanubhāti sarvaṁ

tasya bhāsā sarvamidaṁ vibhāti ।।2।2।।15।।

## तृतीयावल्ली

**२।३।१**

ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः।

तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते।

तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन॥ एतद्वै तत् ॥२।३।१॥

ūrdhvamūlo'vākśākha eṣo'śvatthaḥ sanātanaḥ ।

tadeva śukraṁ tad brahma tadevāmṛtamucyate ।

tasminllokāḥ śritāḥ sarve tadu nātyeti kaścana ।। etadvai tat ।।2।3।1।।

२।३।२

यदिदं किं च जगत्सर्वं प्राण एजति निःसृतम्।

महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ति ॥२।३।२॥

yadidaṁ kiṁ ca jagatsarvaṁ prāṇa ejati niḥsṛtam|

mahadbhayaṁ vajramudyataṁ ya etadviduramṛtāste bhavanti ||2|3|2||

२।३।३

भयादस्याग्निस्तपति भयात्तपति सूर्यः।

भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः ॥२।३।३॥

bhayādasyāgnistapati bhayāt tapati sūryaḥ |

bhayādindraśca vāyuśca mṛatyurdhāvati pañcamaḥ ||2|3|3||

२।३।४

इह चेदशकद् बोद्धुं प्राक् शरीरस्य विस्रसः।

ततः सर्गेषु लोकेषु शरीरत्वाय कल्पते ॥२।३।४॥

iha ced aśakad boddhuṁ prāk śarīrasya visrasaḥ |

tataḥ sargeṣu lokeṣu śarīratvāya kalpate ||2|3|4||

२।३।५

यथाऽऽदर्शे तथाऽऽत्मनि यथा स्वप्ने तथा पितृलोके।

यथाप्सु परीव ददृशे तथा गन्धर्वलोके छायातपयोरिव ब्रह्मलोके ॥२।३।५।

Yathā''darśe tathā''tmani yathā svapne tathā pitṛloke |

yathāpsu parīva dadṛśe tathā gandharvaloke chāyātapayoriva brahmaloke ||2|3|5|

२।३।६

इन्द्रियाणां पृथग्भावमुदयास्तमयौ च यत्।

पृथगुत्पद्यमानानां मत्वा धीरो न शोचति ॥२।३।६॥

indriyāṇāṁ pṛthagbhāvamudayāstamayau ca yat |

pṛthagutpadyamānānāṁ matvā dhīro na śocati ||2|3|6||

२।३।७

इन्द्रियेभ्यः परं मनो मनसः सत्त्वमुत्तमम्।

सत्त्वादधि महानात्मा महतोऽव्यक्तमुत्तमम् ॥२।३।७॥

indriyebhyaḥ paraṁ mano manasaḥ sattvamuttamam |

sattvādadhi mahānātmā mahto'vyaktam uttamam ||2|3|7||

२।३।८

अव्यक्तात्तु परः पुरुषो व्यापकोऽलिङ्ग एव च।

यं ज्ञात्वा मुच्यते जन्तुरमृतत्वं च गच्छति ॥२।३।८॥

avyaktātattu paraḥ puruṣo vyāpako'liṅga eva ca |

yaṁ jñātvā mucyate janturamṛtatvaṁ ca gacchati ||2|3|8||

२।३।९

न सन्दृशे तिष्ठति रूपमस्य

न चक्षुषा पश्यति कश्चनैनम्।

हृदा मनीषा मनसाभिक्लृप्तो

य एतद् विदुरमृतास्ते भवन्ति ॥२।३।९॥

na sandṛśe tiṣṭhati rūpamasya

na cakṣuṣā paśyati kaścanainam |

hṛdā manīṣā manasābhikḷpto

ya etad viduramṛtāste bhavanti ||2|3|9||

**२।३।१०**

**यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह।**

**बुद्धिश्च न विचेष्टति तामाहुः परमां गतिम् ॥२।३।१०॥**

yadā pañcāvatiṣṭhante jñānāni manasā saha |

buddhiśca na viceṣṭati tāmāhuḥ paramāṁ gatim ||2|3|10||

**२।३।११**

**तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम्।**

**अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ ॥२।३।११॥**

tāṁ yogamiti manyante sthirāmindriyadhāraṇām |

apramattastadā bhavati yogo hi prabhavāpyayau ||2|3|11||

२।३।१२

नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा।

अस्तीति ब्रुवतोऽन्यत्र कथं तदुपलभ्यते ॥२।३।१२॥

naiva vācā na manasā prāptuṁ śakyo na cakṣuṣā |

astīti bruvato'nyatra kathaṁ tadupalabhyate ||2|3|12||

२।३।१३

अस्तीत्येवोपलब्धव्यस्तत्त्वभावेन चोभयोः।

अस्तीत्येवोपलब्धस्य तत्त्वभावः प्रसीदति ॥२।३।१३॥

astītyevopalabdhavyastatvabhāvena cobhayoḥ |

astītyevopalabdhasya tattvabhāvaḥ prasīdati ||2|3|13||

२।३।१४

यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः।

अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥२।३।१४॥

yadā sarve pramucyante kāmā ye'sya hṛdi śritāḥ |

atha martyo'mṛto bhavatyatra brahma samaśnute ||2|3|14||

२।३।१५

यदा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रन्थयः।

अथ मर्त्योऽमृतो भवत्येतावद्ध्यनुशासनम् ॥२।३।१५॥

yadā sarve prabhidyante hṛdayasyeha granthayaḥ |

atha martyo'mṛto bhavatyetāvaddhyanuśāsanam ||2|3|15||

**२।३।१६**

**शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका।**

**तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति ॥२।३।१६॥**

śataṁ caikā ca hṛdayasya nāḍyastāsāṁ mūrdhānamabhiniḥ sṛtaikā ।

tayordhvamāyannamṛtatvameti viṣvaṅṅanyā utkramaṇe bhavanti ।।2।3।16।।

**२।३।१७**

**अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा**
**सदा जनानां हृदये संनिविष्टः।**
**तं स्वाच्छरीरात्प्रवृहेन्मुञ्जादिवेषीकां धैर्येण**
**तं विद्याच्छुक्रममृतं विद्याच्छुक्रममृतमिति ॥२।३।१७॥**

aṅguṣṭhamātraḥ puruṣo'ntarātmā
sadā janānāṁ hṛdaye saṁniviṣṭaḥ ।
taṁ svāccharīrātpravṛhenmuñjādiveṣīkāṁ dhairyeṇa
taṁ vidyācchukramamṛtaṁ vidyācchukramamṛtamiti ।।2।3।17।।

२।३।१८

मृत्युप्रोक्तां नचिकेतोऽथ लब्ध्वा

विद्यामेतां योगविधिं च कृत्स्नम्।

ब्रह्मप्राप्तो विरजोऽभूद्विमृत्युर्

अन्योऽप्येवं यो विद्ध्यात्ममेव ॥२।३।१८॥

mṛtyuproktāṁ naciketo'tha labdhvā

vidyāmetāṁ yogavidhiṁ ca kṛtsnam ।

brahmaprāpto virajo'bhūdvimṛtyur

anyo'pyevaṁ yo vidadhyātmameva ।।2।3।18।।

इति कठोपनिषद्